# Shri Batukabhairava Aparadha Kshamapana Stotram

# શ્રીબટુકભૈરવાપરાધક્ષમાપનસ્તોત્રમ્

## Document Information

Text title : baTukabhairavAparAdhakShamApana

File name : shrIbaTukabhairavAparAdhakShamApana.itx

Category : shiva

Location : doc_shiva

Author : Atmarama

Description/comments : Batuka Bhairava Upasana

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 23, 2022

*sanskritdocuments.org*

Shri Batukabhairava Aparadha Kshamapana Stotram

# શ્રીબટુકભૈરવાપરાધક્ષમાપનસ્તોત્રમ્

ૐ ગુરોઃ સેવાં ત્યક્ત્વા ગુરુવચનશક્તોઽપિ ન ભવે
ભવત્પૂજાધ્યાનાજ્જપહવનયાગાદ્વિરહિતઃ ।
ત્વદર્ચ્ચાનિર્માણે ક્વચિદપિ ન યત્નં વ કૃતવા-
ઞ્જગજ્જાલગ્રસતો ઝટિતિ કુરુ હાર્દં મયિ વિભો ॥ ૧॥

પ્રભો દુર્ગાસૂનો તવ શરણતાં સોઽધિગતવાન્-
કૃપાલો દુઃખાર્તઃ કમપિ ભવદન્યં પ્રકથયે ।
સુહૃત્સમ્પત્તેઽહં સરલવિરલઃ સાધકજન-
સ્ત્વદન્યઃ કસ્ત્રાતા ભવદહનદાહં શમયતિ ॥ ૨॥

વદાન્યો માન્યસ્ત્વં વિવિધજનપાલો ભવસિ વૈ
દયાલુર્દીનાર્તાન્ ભવજલધિપારં ગમયસિ ।
અતસ્ત્વત્તો યાચે નતિનિયમતોઽકિઞ્ચનધનઃ
સદા ભૂયાદ્ભાવઃ પદનલિનયોસ્તે તિમિરહા ॥ ૩॥

અજાપૂર્વો વિપ્રો મિલપદપરો યોઽતિપતિતો
મહામૂર્ખો દુષ્ટો વૃજનનિરતઃ પામરનૃપઃ ।
અસત્પાનાસક્તો યવનયુવતીવ્રાતરમણઃ
પ્રભાવાત્ત્વન્નામ્નઃ પરમપદવીં સોઽપ્યધિગતઃ ॥ ૪॥

દયાં દીર્ઘાં દીને બટુક કુરુ વિશ્વમ્ભર મયિ
ન ચાન્યસ્સન્ત્રાતા પરમશિવ માં પાલય વિભો ।
મહાશ્ચર્યં પ્રાપ્તસ્તવ સરલદૃષ્ટ્યા વિરહિતઃ
કૃપાપૂર્ણૈર્નેત્રૈઃ કજદલનિભૈર્માખિચયતાત્ ॥ ૫॥

સહસ્યે કિં હંસો નહિ તપતિ દીનં જનચયઙ્-
ઘનાન્તે કિં ચન્દ્રોઽસમકરનિપાતો ભુવિતલે ।
કૃપાદૃષ્ટેસ્તેહં ભયહર વિભો કિં વિરહિતો
જલે વા હર્મ્યે વા ઘનરસમુયાતો ન વિષમઃ ॥ ૬॥ ઘનરસનિપાતો

ત્રિમૂર્તિસ્ત્વં ગીતો હરિહરવિધાતાત્મકગુણો
નિરાકારઃ શુદ્ધઃ પરતરપરઃ સોઽપ્યવિષયઃ ।
દયારૂપં શાન્તં મુનિગણનુતં ભક્તદયિતં
કદા પશ્યામિ ત્વાં કુટિલકચશોભિત્રિનયનમ્ ॥ ૭॥

તપોયોગં સાંખ્યં યમનિયમચેતઃ પ્રયજનં
ન કૌલાર્ચ્ચાચક્રં હરિહરવિધીનાં પ્રિયતમમ્ । પ્રિયતરમ્
ન જાને તે ભક્તિં પરમમુનિમાર્ગં મધુવિધિં
તથાપ્યેષા વાણી પરિરટતિ નિત્યં તવ યશઃ ॥ ૮॥

ન મે કાંક્ષા ધર્મે ન વસુનિચયે રાજ્યનિવહે
ન મે સ્ત્રીણાં ભોગે સખિસુતકુટુમ્બેષુ ન ચ મે ।
યદા યદ્યદ્ભાવ્યં ભવતુ ભગવન્ પૂર્વસુકૃતાન્
મમૈતત્તુ પ્રાર્થ્યં તવ વિમલભક્તિઃ પ્રભવતાત્ ॥ ૯॥

કિયાઁસ્તેસ્મદ્ભારઃ પતિતપતિતાઁસ્તારયસિ ભો !
મદન્યઃ કઃ પાપી યજનવિમુખઃ પાઠરહિતઃ ।
દૃઢો મે વિશ્વાસસ્તવ નિયતિરુદ્ધારવિષયા
સદા સ્યાદ્ વિશ્રમ્ભઃ ક્વચિદપિ મૃષા મા ચ ભવતાત્ ॥ ૧૦॥

ભવદ્ભાવાદ્ભિન્નો વ્યસનનિરતઃ કો મદપરો
મદાન્ધઃ પાપાત્મા બટુક ! શિવ ! તે નામરહિતઃ ।
ઉદારાત્મન્બન્ધો નહિ તવકતુલ્યઃ કલુષહા
પુનસ્સઞ્ચિન્ત્યૈવં કુરુ હૃદિ યથાયેચ્છસિ તથા ॥ ૧૧॥

જપાન્તે સ્નાનાન્તે હ્યુષસિ ચ નિશીથે પઠતિ યો var જપતિ
મહાસૌખ્યં દેવો વિતરતિ નુ તસ્મૈ પ્રમુદિતઃ ।
અહોરાત્રં પાર્શ્વે પરિવસતિ ભક્તાનુગમનો
વયોન્તે સંહૃષ્ટઃ પરિનયતિ ભક્તાન્ સ્વભુવનમ્ ॥ ૧૨॥

ઇતિ શ્રીસિદ્ધયોગીશ્વરશ્રીધનૈયાલાલશિષેણાત્મારામેણ વિરચિતં
બટુકભૈરવપ્રાર્થનાપરાધક્ષમાપન સ્તોત્ર ॥

*Shri Batukabhairava Aparadha Kshamapana Stotram*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*